प्रकृतिः । यथा,—
"प्रधानं प्रकृतिः शक्तिर्नित्या चाविकृतिस्तथा ।
एतानि तस्या नामानि पुरुषं या समाश्रिता ॥"
तस्या गुणानाह ।
"सत्त्वं रजस्तमश्चेति विज्ञेयाः प्रकृतेर्गुणाः ।"
इति भावप्रकाशः ॥ * ॥
शक्तिविषयकपुष्पाणि यथा,—
"अथ पुष्पं प्रवक्ष्यामि कर्म्मयोगे महेश्वरि ।
शृणुष्व परया भक्त्या यथोक्तं ब्रह्मणा पुरा ॥
कमले करवीरे द्वे कुसुम्भे तुलसीद्वयम् ।
जात्यशोके केतकी द्वे कुमारीचम्पकोत्पलम् ॥
कुन्दमन्दारपुन्नागपाटलानागचम्पकम् ।
आरग्वधं कर्णिकारं पावन्ती नवमल्लिका ॥
सौगन्धिकं सकोरण्टं पलाशाशोकसञ्ज्ञकाः ।
सिन्धुवारो ह्यपामार्गवापुलीकश्च कामजम् ॥
व्याघ्रचेलं दमनकं मरुवकं ततः परम् ।
लवङ्गं जलकर्पूरं तगरश्च जवा तथा ॥
शिवपुष्पं द्रोणपुष्पं कामराजं सुकेतकम् ।
अन्यानि वनपुष्पाणि जलजस्थलजानि च ।
गिरिजानि देशजानि नानापुष्पाण्यतः परम् ॥"
इति प्रपञ्चसारः ॥

शक्तिग्रहः, पुं, ( शक्तिं गृह्णातीति । शक्ति+ग्रह +"शक्तिलाङ्गलाङ्कुशेति ।" ३ । २ । ६ । इत्यस्य वार्त्तिकोक्त्या अच् । ) शिवः । कार्त्तिकेयः । शक्तिं गृह्णाति यः इत्यर्थे शक्तिशब्दपूर्व्वकग्रह-धातोरल्प्रत्ययेन निष्पन्न इति केचित् ॥ (शक्ते-र्ग्रहो ग्रहणम् । ) शब्दशक्तिज्ञानम् । यथा । "अस्मात् शब्दात् अयमर्थो बोद्धव्य इतीश्वरेच्छा शक्तिरिति तार्किकाः । तज्ज्ञानन्तु व्याकरणा-दिभ्यः । अतएव ।
'शक्तिग्रहं व्याकरणोपमान-
कोषाप्तवाक्याद्व्यवहारतश्च ।
वाक्यस्य शेषाद्विवृतेर्वदन्ति
सान्निध्यतः सिद्धपदस्य वृद्धाः ॥'
इति प्राञ्चः ।" इति दुर्गादासः ॥

शक्तिग्राहकः, पुं, व्याकरणोपमानादिः । शक्ति-ग्रहीता च । शक्तिं ग्राहयति गृह्णाति च इत्यर्थे ण्यन्ताण्यन्तग्रहधातोर्णक(ण्वुल्)प्रत्ययेन निष्पन्नमेतत् ॥

शक्तिधरः, पुं, (धरतीति । धृ+अच् । शक्तेर्धरः ।) कार्त्तिकेयः । इत्यमरः ॥ (यथा, हरिवंशे ।७३।६।
"बलेन वपुषा चैव बाल्येन चरितेन च ।
स्यात्ते शक्तिधरस्तुल्यो न तु कश्चन मानुषः ॥")
शक्तिधारके, त्रि ॥ ( यथा, बृहत्संहितायाम् । ५८ । ४१ ।
"स्कन्दः कुमाररूपः शक्तिधरो बर्हिकेतुश्च ॥")

शक्तिपर्णः, पुं, सप्तपर्णवृक्षः । इति जटाधरः ॥

शक्तिपाणिः, पुं, (शक्तिरस्त्रविशेषः पाणौ यस्य ।) कार्त्तिकेयः । इति हलायुधः ॥

शक्तिभृत्, पुं, ( शक्तिं बिभर्त्तीति । भृ+क्विप् । तुक् च । ) कार्त्तिकेयः । इति हेमचन्द्रः ॥ शक्त्यस्त्रधारके, त्रि ॥

शाक्तिहेतिकः, त्रि, (शक्तिर्हेतिः प्रहरणास्त्रं यस्य ।) शक्त्यस्त्रधारियोद्धा । तत्पर्य्यायः । शाक्तीकः २ । इत्यमरः ॥ शक्त्यायुधधरः ३ । इति शब्दरत्नावली ॥

शक्तुः, पुं क्ली, (शक + बाहुलकात् तुन् ।) भर्जित-यवादिचूर्णम् । छातु इति भाषा । यथा,—
"धाना भृष्टयवे भूम्नि स्त्रियां पुंभूम्नि शक्तवः ।
केचित्तु शक्तुरस्त्रीति बन्धुरा भूमनि स्त्रियाम् ॥"
इति जटाधरः ॥
अस्य गुणाः ।
"यवानां शक्तवो रूक्षा लेखना वह्निवर्द्धनाः ।
वातलाः कफरोगघ्ना वातवर्च्चोऽनुलोमनाः ॥
धानासंज्ञास्तु तेऽप्येव दुर्जरा लेखनाः स्मृताः ।
गुर्व्वी पिण्डीकृतात्वर्थं लघ्वी सैव विपर्य्ययात् ।
शक्तूनामाशु जीर्य्येत मृदुत्वादवलेहिका ॥"
इति राजवल्लभः ॥
अथ शक्तवः ।
"धान्यानि भ्राष्ट्रभृष्टानि यन्त्रपिष्टानि शक्तवः ।"
तत्र यवशक्तवः ।
"यवजाः शक्तवः शीता दीपना लघवः सराः ।
कफपित्तहरा रूक्षा लेखनाश्च प्रकीर्त्तिताः ॥
ते पीता बलदा वृष्या बृंहणा भेदनास्तथा ।
तर्पणा मधुरा रुच्याः परिणामे बलावहाः ॥
कफपित्तश्रमक्षुत्तृड्व्रणनेत्रामयापहाः ।
प्रशस्ता घर्म्मदाहाद्या व्यायामार्त्तशरीरिणाम् ॥"
अथ चणकयवशक्तवः ।
"निस्तुषैश्चणकैर्भृष्टैस्तूर्य्यांशेश्च यवैः कृताः ।
शक्तवः शर्करासर्पिःशक्ता ग्रीष्मेऽतिपूजिताः ॥"
अथ शालिशक्तवः ।
"शक्तवः शालिसंभूता वह्निदा लघवो हिमाः ।
मधुरा ग्राहिणो रुच्याः पथ्याश्च बलशुक्रदाः ॥
न भुक्त्वा न रदैश्छित्त्वा न निशायां न वा बहून् ।
न जलान्तरितान् न द्विः शक्तूनद्यान्न केवलान् ॥
पृथक्पानं पुनर्दानं सामिषं पयसा निशि ।
दन्तच्छेदनमुष्णञ्च सप्त शक्तुषु वर्ज्जयेत् ॥"
इति भावप्रकाशः ॥
जन्मतिथौ तद्भक्षणफलम् । ज्योतिषे ।
"शक्तून् खादति यस्तु तस्य रिपवो नाशं
प्रयान्ति ध्रुवं
भुङ्क्ते यस्तु निरामिषं स हि भवेत् जन्मान्तरे
पण्डितः ।"
इति तिथ्यादितत्त्वम् ॥
मेषसंक्रान्त्यां तद्दानविधिर्यथा । स्मृतिः ।
"मेषादौ शक्तवो देया वारिपूर्णा च गर्गरी ।"
महार्णवे ।
"यो ददाति हि मेषादौ शक्तूनम्बुघटान्वितान् ।
पितॄनुद्दिश्य विप्रेभ्यः सर्व्वपापैः प्रमुच्यते ।
विप्रेभ्यः पादुके छत्रं पितृभ्यो विषुवे शुभम् ॥"
इति तिथ्यादितत्त्वम् ॥
चातुर्मास्यव्रते प्रातःस्नानस्य घृतशक्तवो दक्षिणा यथा । नारदीयम् ।
"नित्यस्नाने हविर्दद्याग्निःस्नेहे घृतशक्तवः ॥"
नित्यस्नाने प्रातःस्नाने । इति मलमासतत्त्वम् ॥

शक्तुकः, पुं, विषभेदः । तस्य लक्षणस्वरूपे यथा,
"यद्ग्रन्थिः शक्तुकेनेव पूर्णमध्यः स शक्तुकः ॥"
इति भावप्रकाशः ॥

शक्तुफला, स्त्री, शमीवृक्षः । इत्यमरः ॥

शक्तुफली, स्त्री, शमीवृक्षः । इति शब्दरत्नावली ॥

शक्त्यर्द्धः, पुं, ( शक्तेरर्द्धः ।) श्रमद्वारा कुक्षिललाट-ग्रीवास्तूत्पन्नो घर्म्मः दीर्घनिश्वासश्च । यथा,—
"कुक्षौ ललाटे ग्रीवायां यदा घर्म्मः प्रवर्त्तते ।
शक्त्यर्द्धं तं विजानीयाद्दायतोच्छ्वासमेव च ॥"
इति राजवल्लभः ॥

शक्तिः, पुं, वशिष्ठमुनेर्ज्येष्ठपुत्त्रः । इति पुराणम् ॥ ( यथा, महाभारते । १ । १७७ । ६ ।
"अपश्यदजितः संख्ये मुनिं प्रतिमुखागतम् ।
शक्तिं नाम महाभागं वशिष्ठकुलवर्द्धनम् ।
ज्येष्ठं पुत्त्रं पुत्त्रशतात् वशिष्ठस्य महात्मनः ॥"
अयं हि इक्ष्वाकुवंशीयं कल्माषपादनृपतिं अशपत् । स च नृपती राक्षसो भूत्वा एन-मभक्षयत् । एतद्वृत्तान्तस्तु महाभारते १।१७७ अध्याये द्रष्टव्यः ॥ )

शकः, त्रि, प्रियंवदः । इत्यमरटीकायां भरतः ॥

शक्रुः, त्रि, प्रियंवदः । इत्यमरः ॥

शक्मा,[न्] पुं, (शक+"अशिशकिभ्यां छन्दसि ।" उणा० ४ । १४६ । इति मनिन् ।) शक्तिः । शकधातोरौणादिकमनिन्प्रत्ययेन निष्पन्नम् । इति सिद्धान्तकौमुदी ॥ ( इन्द्रः । इत्युज्ज्वलः । ४ । १४६ ॥ क्ली, शक्यतेऽनेनाभिमतं प्राप्तुं शक्नो-तीष्टं साधयितुं वा शक्यते कर्त्तुमिति वा । शक+मनिन् । कर्म्म । इति निघण्टुः । २ । १ ॥ यथा, ऋग्वेदे । ६ । ३४ । ३ ।
"दुहन्ति शक्मना पयः ॥"
"शक्मना कर्म्मणा ।" इति तद्भाष्ये सायणः ॥)

शक्यः, त्रि, ( शक+"शकिसहोश्च ।" ३।१।९९ । इति यत् । ) समर्थनीयः । (यथा, रघुः । २।४९।
"शक्योऽस्य मन्युर्भवता विनेतुं
गाः कोटिशः स्पर्शयता घटोध्नीः ॥" )
शक्याश्रयः । ( यदा भावे यत् स्यात् तदा क्लीवलिङ्गः स्यात् । यथा, गीतायाम् ।१८।११ ।
"नहि शक्यं देहभृता त्यक्तुं कर्म्माण्यशेषतः ॥"
तथाच रामायणे । २ । १३ । ५ ।
'तानि सर्व्वाणि संयन्तुं शक्यं राम जितेन्द्रियैः ॥")
पुं, वाच्योऽर्थः । यथा,—
"शक्योऽर्थोऽभिधया ज्ञेयः लक्ष्यो लक्षणया
मतः ।
व्यङ्ग्यो व्यञ्जनया ज्ञेयस्तिस्रः शब्दस्य वृत्तयः ॥"
इत्यलङ्कारशास्त्रम् ॥
अन्यच्च ।
"शक्ये सादृश्यबुद्धिस्तु भवेदुपमितौ गुणः ।"
इति भाषापरिच्छेदः ॥
अपि च ।"ईश्वरसङ्केतः शक्तिस्तया अर्थबोधकं पदं वाचकम् । यथा गोत्वादिविशिष्टबोधकं गवादिपदं तद्बोध्योऽर्थो गवादिर्वाच्यः स एव मुख्यार्थ इत्युच्यते ।" इति शक्तिवादः ॥